


॥ प्रथमसूत्रपाठभेदविचारः ॥


सङ्ग्रहकाराः
श्री 1008 श्रीसुबुधेन्द्रतीर्थश्रीपादाः
पीठाधिपतयः
श्रीराघवेन्द्रस्वामिमठः – मन्त्रालयः

श्रीमट्टीकाकृत्पादाः





श्रीमद्राघवेन्द्रतीर्थगुरुसार्वभौमरु



॥ प्रथमसूत्रपाठभेदविचारः ॥

सङ्ग्रहकाराः
श्री १००८ श्रीसुबुधेन्द्रतीर्थश्रीपादाः
पीठाधिपतयः
श्रीराघवेन्द्रस्वामिमठः, मन्त्रालयः

ಗ್ರಂಥದ ಹೆಸರು :
ಪ್ರಥಮಸೂತ್ರಪಾಠಭೇದವಿಚಾರಃ

ಪೇಜೆಸ್ : 24
ಸೈಜ್ : 1/8 ಡಿ.
ಪೇಪರು : 80 ಜಿ.ಯಸ್.ಯಂ.
ಕವರು ಪೇಜಿ : 250 ಜಿ.ಯಸ್.ಯಂ.

ಪ್ರಥಮ ಮುದ್ರಣ : 2014
ಪ್ರತಿಗಳು - 2000

ಮುದ್ರಕರು :
ಶ್ರೀ ರಾಘವೇಂದ್ರ ಸ್ವಾಮಿ ಪ್ರಿಂಟಿಂಗ್ ಪ್ರೆಸ್,
ಎಮ್ಮಿಗನೂರು. ಸೆಲ್: 9247188605

ಮುನ್ನುಡಿ

ಶ್ರೀವೇದವ್ಯಾಸದೇವರು ದ್ವಾಪರಯುಗದಲ್ಲಿ ಅವತಾರ ಮಾಡಿ ವೇದಗಳ ವಿಭಾಗವನ್ನು ಮಾಡಿದ್ದಲ್ಲದೆ, ವೇದಾರ್ಥನಿರ್ಣಾಯಕ–ವಾದ 564 ಬ್ರಹ್ಮಸೂತ್ರಗಳನ್ನು ರಚಿಸಿರುತ್ತಾರೆ. ಈ 564 ಬ್ರಹ್ಮಸೂತ್ರಗಳನ್ನು ಬ್ರಹ್ಮಮೀಮಾಂಸಾಶಾಸ್ತ್ರವೆಂದು ವ್ಯವಹರಿಸಲಾಗಿದೆ.

ಈ ಬ್ರಹ್ಮಮೀಮಾಂಸಾಶಾಸ್ತ್ರದಲ್ಲಿ ಒಟ್ಟು ನಾಲ್ಕು ಅಧ್ಯಾಯ–ಗಳಿರುತ್ತವೆ. ಅವುಗಳ ಪೈಕಿ ಒಂದನೇ ಅಧ್ಯಾಯವನ್ನು **ಸಮನ್ವಯಾಧ್ಯಾಯವೆಂದೂ,** ಎರಡನೇ ಅಧ್ಯಾಯವನ್ನು **ಅವಿರೋಧಾಧ್ಯಾಯವೆಂದೂ,** ಮೂರನೇ ಅಧ್ಯಾಯವನ್ನು **ಸಾಧನಾಧ್ಯಾಯುವೆಂದೂ,** ನಾಲ್ಕನೇ ಅಧ್ಯಾಯುವನ್ನು **ಫಲಾಧ್ಯಾಯವೆಂದು** ವ್ಯವಹರಿಸಲಾಗುತ್ತದೆ.

ಪ್ರತಿಯೊಂದು ಅಧ್ಯಾಯದಲ್ಲೂ ನಾಲ್ಕು ಪಾದಗಳಿರುತ್ತವೆ. ಒಟ್ಟು 16 ಪಾದಗಳಿರುತ್ತವೆ. ಒಂದೊಂದು ಪಾದಕ್ಕೂ ಒಂದೊಂದು ಹೆಸರಿರುತ್ತದೆ. ಬ್ರಹ್ಮಮೀಮಾಂಸಾಶಾಸ್ತ್ರದಲ್ಲಿ ಒಟ್ಟು 222 ಅಧಿಕರಣಗಳಿರುತ್ತವೆ. ಪ್ರತಿಯೊಂದು ಅಧಿಕರಣಕ್ಕೂ ಒಂದೊಂದು ಹೆಸರು ಪ್ರಸಿದ್ಧವಾಗಿದೆ.

ಅವುಗಳ ಪೈಕಿ ಜಿಜ್ಞಾಸಾಧಿಕರಣವೆಂದು ಪ್ರಸಿದ್ಧವಾದ ಮೊದಲನೇ ಅಧಿಕರಣದಲ್ಲಿರುವ ಓಂ **"ಅಥಾತೋ ಬ್ರಹ್ಮಜಿಜ್ಞಾಸಾ"** ಓಂ ಎಂಬ ಸೂತ್ರವು ಬ್ರಹ್ಮಮೀಮಾಂಸಾಶಾಸ್ತ್ರದ ಮೊದಲನೇ ಸೂತ್ರ. ಓಂ **"ಅನಾವೃತ್ತಿಃ ಶಬ್ದಾದನಾವೃತ್ತಿಃ ಶಬ್ದಾತ್"** ಓಂ ಎಂಬ ಸೂತ್ರವು ಕೊನೆಯ ಸೂತ್ರ.

ಬ್ರಹ್ಮಮೀಮಾಂಸಾಶಾಸ್ತ್ರದ ಪ್ರಥಮಸೂತ್ರದಲ್ಲಿ **"ಅಥಾತೋ ಬ್ರಹ್ಮಜಿಜ್ಞಾಸಾ"** ಮತ್ತು **"ಓಮಥಾತೋ ಜಿಜ್ಞಾಸಾ"** ಎಂಬುದಾಗಿ ಎರಡು ತರಹದ ಪಾಠಭೇದವುಂಟೆಂದು ಶ್ರೀಸತ್ಯನಾಥತೀರ್ಥರು ತಮ್ಮ **"ಅಭಿನವಚಂದ್ರಿಕಾ"** ಎಂಬ ಗ್ರಂಥದಲ್ಲೂ ಮತ್ತು ಸುಧಾವ್ಯಾಖ್ಯಾನದಲ್ಲೂ ಹೇಳಿರುತ್ತಾರೆ.

ಆದರೆ ಕಾಶೀಆಚಾರ್ಯರು ತಮ್ಮ ಸುಧಾವ್ಯಾಖ್ಯಾನದಲ್ಲಿ **"ತದಪರೇ ನ ಕ್ಷಮಂತೇ"** ಎಂದು ಹೇಳಿದಂತೆ ಮಾಧ್ವರಲ್ಲೇ ಬೇರೆ ಟಿಪ್ಪಣೀಕಾರರೇ ಮೊದಲಾದವರು ಈ ಮೇಲೆ ಹೇಳಿದಂತೆ ಪ್ರಥಮಸೂತ್ರದ ಪಾಠಭೇದವನ್ನು ಸಹಿಸುವುದಿಲ್ಲ. (ಒಪ್ಪುವುದಿಲ್ಲ) ಬೇರೆಯವರು **"ಓಂ ಅಥಾತೋ ಬ್ರಹ್ಮಜಿಜ್ಞಾಸಾ ಓಂ"** ಎಂಬುದಾಗಿ ಪ್ರಥಮಸೂತ್ರದ ಒಂದೇ ಪಾಠವನ್ನು ಒಪ್ಪುತ್ತಾರೆ.

ಶ್ರೀಸತ್ಯನಾಥತೀರ್ಥರು ತಮ್ಮ ಗ್ರಂಥಗಳಲ್ಲಿ ಪ್ರಥಮಸೂತ್ರದ ಪಾಠಭೇದದ ವಿಷಯಕ್ಕೆ ಕೆಲವೊಂದು ಜ್ಞಾಪಕಗಳನ್ನು

ಹೇಳಿರುತ್ತಾರೆ. ಬೇರೆಯವರು ಶ್ರೀಸತ್ಯನಾಥತೀರ್ಥರು ಹೇಳಿದ ಸೂತ್ರದ ಪಾಠಭೇದದ ವಿಷಯದಲ್ಲಿ ಆ ಜ್ಞಾಪಕಗಳು, ನಿರವಕಾಶ ಜ್ಞಾಪಕಗಳು ಆಗುವುದಿಲ್ಲವೆಂದು ಸಮರ್ಥಿಸಿ ಪ್ರಥಮ ಸೂತ್ರದಲ್ಲಿ **"ಓಂ ಅಥಾತೋ ಬ್ರಹ್ಮಜಿಜ್ಞಾಸಾ ಓಂ"** ಎಂಬ ಪಾಠವು ಮುನಿತ್ರಯರಿಗೆ ಸಮ್ಮತವಾದದ್ದೆಂದು ಸ್ಪಷ್ಟವಾಗಿ ತಿಳಿಸಿರುತ್ತಾರೆ.

ಉದಾಹರಣೆಗೆ ಶ್ರೀಹಂಸನಾಮಕ ಪರಮಾತ್ಮನ ಸಾಕ್ಷಾ-ತ್ಪರಂಪರೆಯಾದ ಜಗದ್ಗುರು ಶ್ರೀಮನ್ಮಧ್ವಾಚಾರ್ಯರ ಮೂಲ-ಮಹಾಸಂಸ್ಥಾನವೆಂದು ಪ್ರಸಿದ್ಧವಾದ ನಮ್ಮ ಶ್ರೀಮಠದ ಪೂರ್ವಿಕ ಗುರುಗಳಾದ ಶ್ರೀವಸುಧೇಂದ್ರತೀರ್ಥರ ವಿದ್ಯಾಶಿಷ್ಯರೂ ಮತ್ತು ನಮ್ಮ ಶ್ರೀಮಠದ ಶಿಷ್ಯರೂ ಆದ ಅಯ್ಯಣಾಚಾರ್ಯ-ರೆಂಬುವರು **"ಆದ್ಯಸೂತ್ರಾರ್ಥಮಂಜರೀ"** ಎಂಬ ಸ್ವತಂತ್ರಗ್ರಂಥವನ್ನು ರಚಿಸಿರುತ್ತಾರೆ. ಆ ಗ್ರಂಥವು ನಮ್ಮ ಶ್ರೀಮಠದಿಂದ ಮುದ್ರಣಗೊಂಡಿದೆ. ಆ ಗ್ರಂಥದಲ್ಲಿ ಪ್ರಥಮಸೂತ್ರದ ಪಾಠಬೇದವಿಷಯದಲ್ಲಿ ಶ್ರೀಸತ್ಯನಾಥತೀರ್ಥರು ಹೇಳಿರುವ ಜ್ಞಾಪಕಗಳನ್ನು ಅನುವಾದ ಮಾಡಿ ಅವುಗಳಿಗೆ ಉತ್ತರವನ್ನು ಕೊಟ್ಟು ಪ್ರಥಮಸೂತ್ರದಲ್ಲಿ **"ಓಂ ಅಥಾತೋ ಬ್ರಹ್ಮಜಿಜ್ಞಾಸಾ ಓಂ"** ಎಂಬ ಒಂದೇ ಪಾಠ ಸರ್ವಸಮ್ಮತವಾದದ್ದೆಂದು ಸಮರ್ಥಿಸಿರುತ್ತಾರೆ.

ಶ್ರೀಸತ್ಯನಾಥತೀರ್ಥರು ಮತ್ತು ಅಯ್ಯಣಾಚಾರ್ಯರು ಇವರಿಬ್ಬರ ಅಭಿಪ್ರಾಯಗಳನ್ನು ಸುಲಭವಾಗಿ ತಿಳಿಯುವಂತೆ ಅವರೀರ್ವರ ಗ್ರಂಥಗಳಲ್ಲಿರುವ ವಿಷಯಗಳನ್ನು ಏಕತ್ರ ಸಂಗ್ರಹಿಸಿ **"ಪ್ರಥಮಸೂತ್ರಪಾಠಭೇದವಿಚಾರಃ"** ಎಂಬ ಸಂಗ್ರಹರೂಪವಾದ ನಮ್ಮ ಈ ಕಿರು ಕೃತಿಯಲ್ಲಿ ಕೊಡಲಾಗಿದೆ. ಇದರ ಲಾಭವನ್ನು ಎಲ್ಲರೂ ಪಡೆದುಕೊಳ್ಳಬೇಕೆಂದು ನಮ್ಮ ಅಪೇಕ್ಷೆ.

ಈ ಸಂಗ್ರಹರೂಪವಾದ ನಮ್ಮ ಕೃತಿಯಲ್ಲಿ ಸೌಕರ್ಯದ ಸಲುವಾಗಿ ಶ್ರೀಸತ್ಯನಾಥತೀರ್ಥರು ಎನ್ನುವುದಕ್ಕೆ ಸ.ನಾ. ಎಂಬುದಾಗಿಯೂ ಅಯ್ಯಣಾಚಾರ್ಯರಿಗೆ ಅ.ಆ... ಎಂಬುದಾಗಿಯೂ ಸಂಕೇತ ಮಾಡಲಾಗಿದೆ.

ಒಟ್ಟಿನಲ್ಲಿ ಹೇಳುವುದಾದರೆ, ಮೇಲೆ ಕಾಣಿಸಿರುವ ಸಂಗ್ರಹರೂಪವಾದ ನಮ್ಮ ಕೃತಿಯಲ್ಲಿ ಅವರೀರ್ವರ ಗ್ರಂಥಗಳಲ್ಲಿರುವ ವಾಕ್ಯಗಳನ್ನೇ ಸಂಗ್ರಹಿಸಿ ಕೊಡಲಾಗಿದೆ.

ಈ ಕೃತಿಯಲ್ಲಿ ನಮ್ಮ ಶ್ರೀಮಠದಿಂದ ಮುದ್ರಣ ಮಾಡಿಸಿರುವ ಸುಧಾಗ್ರಂಥದ ಪ್ರಕಾರ ಪುಟ ಸಂಖ್ಯೆ ಮುಂತಾದವುಗಳನ್ನು ಕೊಡಲಾಗಿದೆ.

ಇತಿ ನಾರಾಯಣಸ್ಮರಣೆಯೊಂದಿಗೆ
ಶ್ರೀಸುಬುಧೇಂದ್ರತೀರ್ಥರು
ಪೀಠಾಧಿಪತಿಗಳು
ಶ್ರೀರಾಘವೇಂದ್ರಸ್ವಾಮಿಗಳವರ ಮಠ ,ಮಂತ್ರಾಲಯ

॥श्रीः॥

॥ प्रथमसूत्रपाठभेदविचारः ॥

जगज्जन्मादिहेतुर्यः सार्वज्ञ्यादिगुणोज्वलः ।
नारायणावतारं तं मूलराममुपास्महे ॥ १ ॥
द्वैतवादस्य रक्षार्थमवतीर्णान् महागुरून् ।
मध्वाचार्यसुधाचार्यव्यासतीर्थान् सदा नुमः ॥ २ ॥
श्रीमतो राघवेन्द्रस्य नमामि पदपङ्कजे ।
कामिताशेषकल्याणकलनाकल्पपादपौ ॥ ३ ॥
सुशमीन्द्रकराब्जोत्थं राघवेन्द्रगुरुप्रियम् ।
सुयतीन्द्रगुरुं वन्दे मूलरामार्चने रतम् ॥ ४ ॥
आद्यसूत्रस्य पाठेऽपि भेदो यः प्राक्तनैः कृतः ।
तत्रापि सविमर्शं यो निर्णयस्तं प्रदर्शये ॥ ५ ॥

१. श्रीसत्यनाथतीर्थाः (स.ना)
(सुधासम्पुट–२–सुधावाक्यवृन्द १०५–स.ना. व्याख्या–पृष्ट–सं– ५४४)

प्रथमसूत्रस्य पाठद्वयम् । अथातो ब्रह्मजिज्ञासेत्याद्यः सूत्रप्रणयनावसरे निर्मितः । द्वितीयस्तु ओम् अथातो

जिज्ञासेति सूत्रोपदेशावसरे निर्मितः । आद्यपाठाभिप्रायेण भाष्यन्यायविवरणे प्रवृत्ते । भाष्ये अथशब्दो मङ्गलार्थ इति ओम् शब्दमव्याख्याय अथशब्दस्यैव व्याख्या-तत्वात् । कथमन्यथा प्राथमिकमोङ्कारमव्याख्यायाथशब्दं व्याकुर्वन् अकुशलो न स्यात् ?

• **अय्यणाचार्याः (पृष्ट सं-१३)**

भाष्ये ओङ्काराव्याख्यानं तु उत्तरप्रस्थाने अनुव्याख्याने व्याकरिष्यमाणत्वाद्वा छान्दोग्याद्युपनिषद्भाष्योदाहृतवचनै-र्व्याख्याततत्वाद्वा पूर्वपक्षप्रापकाधिकार्याद्यभावरूपहेतु-चतुष्टयनिरासकत्वाभावाद्वा केवलदृष्टार्थकातःशब्दवै-लक्षण्यज्ञापनाय वा उपपद्यते ।

• **(परिमले-सुधावाक्यवृन्द-९८ पृष्ट सं ५११-५१२)**

सूत्रकृताऽथातो ब्रह्मजिज्ञासेत्युक्तावपि, स्रवतीत्यादि-निन्दार्थवादबलेन आद्यन्तयोरोङ्कारमध्याहृत्य, अग्निमीळ इत्यादाविव अध्येतारो अधीयते । तदभिप्रायेणैव ताराथमूलत्वमिति पूर्वार्धं प्रवृत्तम् । न तु सूत्रकृताऽथादिपदसमानतयाऽप्योङ्कारस्य कृतत्वाभिप्रायेण । अत एव श्रीमद्भाष्ये अथादिपदादेरेवार्थोक्तिः। "अथातःशब्दपूर्वाणि सूत्राणि निखिलान्यपि" इति, तावेवादौ

प्रयुञ्जत इति चोपक्रमोपसंहारोपेतप्रमाणोदाहरणं च)

२. (स.ना.सुधाव्याख्या-पृष्टसंख्या-५४४)

न्यायविवरणे च जीवव्यतिरिक्तेश्वराभावात्तस्य च स्वप्रकाशत्वेन नित्यसिद्धत्वात् अजिज्ञास्यतेत्यतो अथातो ब्रह्मजिज्ञासेत्याह इत्यभिधानात् ।

• **(अ.आ-पृष्ट सं-१७)**

न्यायविवरणे जीवव्यतिरिक्तेश्वराभावात्तस्य च स्वप्रकाशत्वेन नित्यसिद्धत्वात् न जिज्ञास्यतेत्यतो अथातो ब्रह्मजिज्ञासेत्याहेति ओङ्काररहितसूत्रपाठोऽपि सूत्रकारै-रोङ्कारस्य अनुच्चारितत्वेन यथास्थितानुवादरूपत्वेन सम्भवतीति अविरुद्धः ।

• **(पृष्ट सं-१८)**

न च न्यायविवरणादौ अथातो ब्रह्मजिज्ञासेत्याहेत्यादिना ओङ्काररहितसूत्रपाठश्रवणात् पाठभेदे न्यायविवरणादिरेव ज्ञापक इति वाच्यम् । न्यायविवरणे ओङ्काररहितसूत्रपाठवत् ब्रह्मपदरहितसूत्रपाठस्य क्वाप्यनुपलम्भेन न्यायविवरणस्य यथास्थितानुवादरूपत्वेन तस्य पाठभेदज्ञापक-त्वासम्भवात् ।

३ (स.ना सुधाव्याख्या पृष्ट सं–५४४)

"अनुव्याख्यानं तु पाठद्वयाभिप्रायेण प्रवृत्तम् । ओङ्काराथशब्दयोरुभयोरपि व्याख्यानात् ॥

• (अ.आ.पृष्ट सं–१३)

अनुभाष्ये व्याख्यानं तु ओङ्कारस्य दृष्टादृष्टोभयार्थता सम्भवतीत्यभिप्रेत्य इति नानुपपत्तिः ।

४ (स.ना. सुधाव्याख्या पृष्ट सं–५४४)

अवश्यं चैतदेवं विज्ञेयम् । "अथातो ब्रह्मजिज्ञासा" अथात ओम् जिज्ञासेत्यन्वयसम्भवात् । अन्यथा शब्द–द्वयोपेतः एक एव पाठ इत्यङ्गीकारे जिज्ञासापदस्य ब्रह्मपदेनान्वितत्वात् ओङ्कारेणान्वयो न स्यात् । बुद्ध्या विवेकस्यागतिकगतित्वात् ।

• (अ.आ पृष्ट सं–२०)

अत एव च अवश्यं चैतदेवं विज्ञेयमित्यादि बुद्ध्या विवेकस्य अगतिकागतित्वादित्यन्तं समाहितं भवति । जिज्ञासापदस्य ओङ्कारान्वितब्रह्मपदेन वा ब्रह्म–पदान्वितोङ्कारेण वा अन्वयस्याभिहितत्वात् । लोके व्यवहितान्वयस्थले बुद्ध्या विवेकेनैव अन्वयस्य वक्तव्यत्वेन

तद्वत्प्रकृतेऽप्युपपत्तेः । पाठभेदपक्षेऽपि ओम् अथातो जिज्ञासेत्यत्र बुद्ध्या विवेकेन विशेष्यवाचकपदमध्याहृत्य तत्र ओङ्कारान्वयं च स्वीकृत्य गुणपूर्णस्य ब्रह्मणः जिज्ञासेत्यन्वयोक्त्युपपत्तेः । अन्यथा ओम् आत्मेति तूपगच्छन्ति ग्राहयन्ति च ओम् (४–१–२) इत्यत्र सुधायां आत्मशब्दस्य आवृत्तिमङ्गीकृत्य बुद्ध्या विवेकेन आत्मा = स्वामी, आत्मा = विष्णुरित्यर्थप्रतिपादनम् अनुपपन्नं स्यात् । तत्रापि आत्मशब्दस्यावृत्तिमन्तरा स्वामित्वविशिष्ट–विष्ण्वर्थत्वस्य वक्तुं शक्यत्वात् ।

५ (स.ना सुधाव्याख्या पृष्ट सं–५४४)

अन्यथा तथात्वे प्रथमसूत्रं न्यूनमापद्येत । अधिकार्यादि–प्रतिपादकस्यान्यस्याभावादिति प्राक्तनं (सु.पृ.सं ४८१) टीकावाक्यमयुक्तं स्यात् । कुतः विषयसमर्पकस्य ब्रह्मशब्दस्य सद्भावेनादिशब्दसङ्ग्राह्याभावात् ।

• (अ.आ. (पृ. सं–२०–२१)

एतेनान्यथा तथात्वे प्रथमसूत्रं न्यूनमापद्येत । अधि–कार्यादिप्रतिपादकस्यान्यस्याभावादिति सुधावाक्यं चानर्थकं स्यात् । विषयसमर्पकस्य ब्रह्मशब्दस्य सद्भावेनादिशब्द–

सङ्ग्राह्यत्वाभावादित्येतदपि परिहृतप्रायम् । ब्रह्मशब्दस्य केवलयोगांशं स्वीकृत्य विशेषणार्पकत्वविवक्षायाम् आदिशब्दार्थविषयसमर्पकस्योङ्कारातिरिक्तस्यान्यस्या- भावादिति सुधावाक्यार्थस्य समीकर्तुं शक्यत्वात् ।

यद्वा अधिकार्यादिप्रतिपादकस्येत्यादेरयमर्थः :- अधिकार्यादिप्रतिपादकत्वं नामाधिकार्यादिप्रतिपत्तिजनक- त्वम् । प्रतिपत्तिश्च प्रमारूपैव । तथाच प्रमाणाधीना प्रमेयसिद्धिरिति न्यायेनोङ्काराभावे आदिशब्दार्थेश्वररूप- विषयप्रमितिजनकस्यान्यस्याभावेन विषयाभावात् प्रथमसूत्रं न्यूनमापद्यतेति । न च विषयप्रतिपादकस्य ब्रह्मशब्दस्य सत्वान्न न्यूनमिति वाच्यम् । ब्रह्मशब्दस्य विषयप्रतिपादक- त्वेऽपि तत्र प्रमाणत्वाभावात् । न हि घटसद्भावे किं प्रमाणमिति प्रश्ने घटशब्द एवेति प्रयोक्तुं शक्यते । न च ब्रह्मशब्दवत् ओङ्कारस्यापि विष्णुनामत्वेन कथं तस्य तत्र प्रामाण्यमिति वाच्यम्? सर्ववेदानां परम्परयोङ्कार व्याख्यानरूपत्वेन व्याख्यानव्याख्येययोः समानार्थत्वेनोङ्कारार्थत्वेन परम्परया सर्ववेदार्थत्वस्यानुमातुं शक्यात्वादोङ्कारे प्रयुक्ते तदर्थेश्वरे सर्ववेदानां

प्रामाण्यमभिहितं भवतीति विषयसिद्ध्या प्रथमसूत्रस्य न्यूनत्वाभावात् ।

ब्रह्मशब्दस्य परम्परया सर्ववेदव्याख्येयत्वाभावेन तन्मात्रस्य विषयसिद्धिसाधकत्वाभावाच्च । तथाच पाठभेदपक्ष एव सुधावाक्यमनर्थकमित्येकपाठपक्ष एव युक्तः ।

६) स.ना सुधाव्याख्या पृ. सं-५४४)

किञ्च ब्रह्मशब्देनैव गुणपूर्णत्वस्याभिहितत्वात् ओङ्कारस्य वैयर्थ्यम् । ताभ्यां च तत्सकलजीवजडात्मका- त्प्रपञ्चाद्विलक्षणमवगम्यत इति सुधोक्तेश्च ।

- **(अ.आ पृ.सं २१)**

अत एव ब्रह्मशब्देन गुणपूर्णत्वस्याभिहितत्वात् ओङ्कारवैयर्थ्यम् इत्यादि, ताभ्यां च सकलजीवजडात्म- कात्प्रपञ्चात् विलक्षणमवगम्यत इति सुधोक्तेश्चेत्येतच्च समाहितम् ।

ओङ्कारब्रह्मशब्दयोर्द्वयोरपि योगरूढत्वमङ्गीकृत्य सार्थकत्वस्याभिहितत्वात् । स एव ब्रह्मशब्दार्थ इति ब्रह्मशब्दयोगार्थकथनस्यापि केवलरुढिव्यावृत्यर्थ-

त्वादित्युक्तत्वात् । ताभ्यां चेत्यादिसुधावाक्यस्यापि एकस्य विशेषणार्पकत्वमन्यस्य विशेष्यार्पकत्वमिति विवक्षया ताभ्यां च सह सर्वविलक्षणं वस्त्ववगम्यत इति वा एकस्य विषयसमर्पकत्वमन्यस्य तत्र प्रमाणार्पकत्वमिति वाऽङ्गीकर्तुं शक्यत्वात् । अन्यथा पाठभेदपक्षे एकैकेन पदेन तादृशवस्त्ववगम्यत इति वक्तव्ये ताभ्यामित्यादि सुधावाक्यं विरुध्येत ॥

७ (स.ना अभिवनचन्द्रिका पृष्ट सं ३१–३२)

सूत्रकाराणां पाठोऽभिमत इति दृष्टचरमेतत् । तथाहि :- इह तावत्सूत्रस्य पाठद्वयं दृश्यते । ओम् पुरुषाश्मवदिति चेत्तत्रापि ओम् (२–२–४–७) इत्येकः पाठः । अपरस्तु ओम् पुरुषाश्मवदिति चेत्तथापि ओम् इति । "वृद्धिरादैच्" (१–१–१/१६) अदेङ्गुणः (१–१–२/१७) इत्यत्र संहिताऽसंहिताभेदेन पाठभेदः पाणिनेरप्यभिमतः ।

• (अ.आ पृष्ट.सं २१–२२)

यत्तावदुक्तम् इह सूत्रस्य पाठद्वयं तावद्दृश्यते । पुरुषाश्मवदिति चेत्तत्रापीति एकः (पाठः) । अपरस्तु पुरुषाश्मवदिति चेत्तथापीति । तत्रापीदमुत्तरं दृष्टान्तदा-

र्ष्टान्तिकयोर्वैषम्यात् । पुरुषाश्मवदिति चेत्तत्रापीत्यत्र पाठद्वये भाष्यानुभाष्ययोर्ज्ञापकयोरिव प्रकृते पाठभेदे निरवकाश-ज्ञापकाभावात् । अनुभाष्ये तत्रापीत्यस्यैव तथापीत्यर्थानुवादसम्भवाच्च । "वृद्धिरादैच्","अदेङ्गुणः" इत्यत्रापि संहिताऽसंहिताभेदेन पाठभेदस्य प्रयोजन-विशेषापेक्षया वक्तुं शक्यत्वेऽपि प्रकृते प्रयोजनविशेषाभावेन पाठभेदकल्पनाया अयुक्तत्वात् । पुरुषाश्मवदित्यादौ पाठभेदस्य सूत्रभेदानापादकत्वेन वक्तुं शक्यत्वेऽपि प्रकृते सूत्रद्वैविध्यापादकपाठभेदस्य क्वाप्यदृष्टत्वादित्यलं विस्तरेण ।

तस्मात् ओम् अथातो ब्रह्मजिज्ञासेत्येव आदिमं सूत्रमिति श्रीमद्व्यासराजतीर्थपूज्यचरणानां सरणिः ।

८.(स. ना अभिनवचन्द्रिका पृष्ट.सं–२९)

आद्यं द्वितीयं चेत्युभयमपि सुधाकृतो मतम् । तत्राद्यमतस्य तु ज्ञापकमुक्तमेव ।

• (अ.आ पृष्ट.सं–१८)

यच्चोक्तमाद्यं द्वितीयं चेत्युभयमपि सुधाकृतो मतम्।

तत्राद्यमतस्य ज्ञापकत्वमुक्तमेव सुधाकृता इति । तदप्यनुपपन्नम् । ओङ्काररहितसूत्रपाठेऽभिहितानां ज्ञापकानां परिहृतत्वेन तस्य सुधाकृदभिमतत्वाभावात् ।

९) स.ना. अभिनवचन्द्रिका पृष्ट .सं–२९)

सुधाकृता द्वितीयमताङ्गीकारे तु " तत्र ताराथमूलत्वं सर्वशास्त्रस्य चेष्यत "इत्यनुव्याख्याने अथशब्दवदोङ्कारस्य सर्वशास्त्रमूलत्वोक्तिर्लिङ्गम् ।

• (अ.आ.पृष्ट.सं–१८)

यच्च सुधाकृता द्वितीयमताङ्गीकारे " तत्र ताराथमूलत्वं सर्वशास्त्रस्य चेष्यते "इत्यनुव्याख्याने अथशब्दवदोङ्कारस्य सर्वशास्त्रमूलत्वोक्तिर्लिङ्गमित्युक्तम् । तदपि न । तावता ओङ्कारसहित एव सूत्रपाठः । ओम् अथातो जिज्ञासेति द्वितीयः । तत्रैवेदमनुव्याख्यानवचनमिति निर्णयासम्भवात् । ओम् अथातो ब्रह्मजिज्ञासेति ओम् ब्रह्मशब्दसहितै–कसूत्रपाठ एव तद्वचनस्य ज्ञापकत्वसम्भवात् तथैव तद्वचनस्य सुधातत्त्वप्रकाशिकयोः व्याख्याततत्वाच्च ।

१०.(स.ना. अभिनवचन्द्रिका पृष्ट.सं–३०)

यदत्रोक्तं ओम्ब्रह्मशब्दोपेतसूत्रोपन्यासाच्चेति तत्पाठद्वयं

सङ्कलय्योपन्यस्तमित्यङ्गीकारान्न विरुद्धम् ।

• (अ.आ.पृष्ट.सं–१८)

यच्चोक्तं ओम्ब्रह्मशब्दोपेतसूत्रोपन्यासोऽपि पाठद्वयं सङ्कलय्योपन्यस्तमिति न विरुद्ध इति तदपि न । पाठद्वय–सद्भावे निरवकाशज्ञापके सति ओम्ब्रह्मशब्दोपेत–सूत्रोपन्यासः पाठद्वयसङ्कलनाभिप्रायेण प्रवृत्त इति ज्ञातुं शक्यते । पाठद्वयसद्भाव एव प्रमाणाभावात् । प्रत्युत ओम्ब्र–ह्मशब्दोपेतैकसूत्रपाठपक्ष एव बहुज्ञापकसद्भावात् ॥

११.(स.ना. अभिनवचन्द्रिका पृष्ट.सं–३०)

यदत्रोक्तं "तारश्चाथश्च तयोर्मूलत्वं क्रमेणादित्वमिति तत्पाठभेदे लिङ्गम् । न ह्येकपाठपक्षे द्वयोर्मुख्यादित्वं सम्भ–वति । अमुख्यमादित्वमेकस्य वक्तुं युक्तम् । तदिदमुक्तं क्रमेणेति पर्यायेणेत्यर्थः । पूर्वपाठे अथशब्दस्य द्वितीयपाठे ओङ्कारस्य आदित्वमिति विवेकः।

• (अ.आ.पृष्ट.सं –१८–१९)

यच्चोक्तं तारश्चाथश्च तयोर्मूलत्वं क्रमेणादित्वमिति सुधावाक्यं पाठभेद एव लिङ्गम् । न ह्येकपाठपक्षे द्वयोर्मु–ख्यादित्वं सम्भवति । किन्त्वेकस्य मुख्यम् अपरस्य अमुख्यं

द्वितीयत्वात् । न च द्वयोर्मुख्यादित्वं वक्तुं युक्तमिति । तत्रापीदं विज्ञापनम् एकसूत्रपाठपक्षेऽपि उभयोरादित्वसम्भवात् । न च मुख्यादित्वस्य सुधाभिप्रेतत्वादेकसूत्रपाठपक्षे तस्य बाधित्वादिति वाच्यम् । उभयोर्मुख्यादित्वं सुधाभिप्रेतमित्यत्र प्रमाणाभावेन एकस्य मुख्यादित्वमपरस्य अमुख्यादित्वमित्यपि वक्तुं शक्यत्वात् । अन्यथा "ओङ्कारश्चाथशब्दश्च तस्मात्प्राथमिकौ क्रमात् । तद्धेतुत्वं वदंश्चापि तृतीयोऽत उदाहृतः" इति श्रीमद्भाष्यव्याख्यावसरे तत्त्वप्रकाशिकायां सुधाकृद्भिरेव अतश्च तृतीयतया प्राथमिक उदाहृत इति व्याख्याततत्वेन अतःशब्दाथशब्दयोः तृतीयद्वितीयतया प्राथमिकत्वप्राप्त्योङ्कारस्य मुख्यप्राथमिकत्वप्राप्त्या तद्विरो–धात् । किञ्च यद्योङ्कारस्य मुख्यादित्वसम्पादनाय पाठभेदः इत्याग्रहः तर्हि अथातःशब्दपूर्वाणि, तावेवादौ प्रयुञ्जत इत्यत्रापि अथातःशब्दयोरपि मुख्यादित्वसम्पादनाय अथशब्दपूर्वं सूत्रमन्यत् अतःशब्दपूर्वं सूत्रमन्यदिति पाठत्रयमप्यङ्गीक्रियेत । अत एवोक्तं भाष्यसुधयोः क्रमादिति क्रमेणेति च ।

१२.(स.ना.अभिनवचन्द्रिका पृ.सं–३०)

यदपि" यदुक्तं जीवव्यतिरिक्तेश्वर एव नास्तीति तत्प–रिहाराय सूत्रकृता ओङ्कारब्रह्मशब्दौ प्रयुक्तावििति तदपि पाठभेदे लिङ्गम् । एकेनैव शब्देन शङ्कायाः परिहृतत्वात् अपरप्रयोगवैयर्थ्यात् । यदेकेनापि वर्णेन अनर्थकेन सूत्रे न भवितव्यं, किं पुनः पदेन । तस्मादकामेनापि एकस्मिन्पाठे शङ्कापरिहारायैकपदमुपात्तम् ॥ अपरस्मिन्पाठे तच्छङ्कापरिहाराय पदान्तरमिति व्यवस्थाऽऽश्रयणीयेति ।

- **(अ.आ.पृ.सं–१९)**

यदपि चोक्तं जीवव्यतिरिक्तेश्वर एव नास्तीति तत्परिहाराय सूत्रकृतोङ्कारब्रह्मशब्दौ प्रयुक्ताविति सुधावाक्यमपि पाठभेदे लिङ्गम् । एकपाठपक्षे एकेनैव शब्देन शङ्कायाः परिहृतत्वात् अपरप्रयोगवैयर्थ्यात् । तस्मादकामेनापि एकस्मिन्पाठे शङ्कापरिहारायेदं पदं अन्यस्मिन्पाठे तच्छङ्कापरिहाराय पदान्तरमिति व्यवस्था आश्रयणीयेति । तत्रापीदं प्रतिभाति । जीवातिरिक्तेश्वरसद्भावे प्रमाणाभावेन जीवस्याहमिति नित्यसिद्धत्वेन विषयाभावात्

जिज्ञासा न कार्येति प्राप्ते जीवव्यतिरिक्तेश्वरसद्भावे वेद एव प्रमाणमित्यभिप्रायेण सूत्रकृतोङ्कारस्य प्रयुक्तत्वात् । तेन च जीवातिरिक्तेश्वरसिद्ध्या ब्रह्मणि गुणोतत्वसिद्ध्या च विषयलाभात् जिज्ञासा कर्तव्येतदभिप्रायेण जीवातिरिक्त इत्यादिसुधावाक्यस्य प्रवृत्तत्वात् ।

१३. (स.ना. अभिनवचन्द्रिका पृ.सं–३०)

यदपि तदेतावोङ्कारब्रह्मशब्दावपि यौगिकौ जिज्ञास्य–मनन्तगुणपरिपूर्णं प्रतिपादयन्तौ जीवजडयोस्तदयोगात् तद्व्यतिरिक्तमेव किञ्चद्रमयत इति तदप्येवमेवास्माकमेव साधकं न परस्य । एकेनैव पूर्णत्वेनापरस्य वैयर्थ्यप्र–सङ्गात् । पाठभेदेनैव तयोर्गमकत्वस्याङ्गीकार्यत्वात् ॥

•(अ.आ. पृ.सं –१९–२०)

अत एव यदपि तदेतावोङ्कारब्रह्मशब्दौ यौगिकौ जिज्ञास्यमप्यनन्तगुणपरिपूर्णं प्रतिपादयन्ताविति तदप्यस्मा–कमेव साधकं न परस्येत्याद्यपि समाहितं भवति । एकपाठपक्षेऽपि द्वयोरपि सार्थकत्वस्याभिहितत्वात् । ओङ्कारब्रह्मशब्दयोर्द्वयोरपि योगरूढत्वमङ्गीकृत्य ब्रह्मशब्दस्य रु ंशं ओङ्कारस्य योगाशं च स्वीकृत्य गुणपूर्णस्य ब्रह्मण इत्यन्वयसम्भवादिति । न च यौगिकौ अनन्तगुणपरिपूर्णं

प्रतिपादयन्ताविति द्वयोरपि केवलयौगिकत्वप्रापकसुधाविरोध इति वाच्यम् । यौगिकावित्यस्य केवलरूढिमात्रव्यावृत्यर्थत्वेन योगरू विरोधित्वात् । अनन्तगुणपरिपूर्णं प्रतिपादयन्तौ इत्यस्यापि यौगिकावित्यस्योपपादकत्वेन योगार्थोऽपि प्रकृतोपयुक्त इत्यभिप्रायेण प्रवृत्तत्वात् ।

१४ (स.ना अभिनवचन्द्रिका– पृष्ट.सं–२९)

अत्र द्वे दर्शने अथातो ब्रह्मजिज्ञासेत्यादिमं सूत्रमित्ये–कम् । अपरं तु ओम् अथातो जिज्ञासेति । तत्राद्यं सन्न्यायरत्नावलीकृतो दर्शनम् । तत्र व्याख्येयस्य शास्त्र–स्येदमादिमं सूत्रम् अथातो ब्रह्मजिज्ञासेति । तत्र ओङ्कारश्चाथशब्दश्च मङ्गलार्थत्वात् आदितः प्रयोक्तव्यौ । ओङ्कारस्तु स्रवत्यनोङ्कृतं ब्रह्म इत्यादिवचनात् प्रत्यधिकरण–मनुवर्तमानत्वात् पृथुगुच्चरितो वेदितव्यः । न अथशब्द–वत्सूत्रोपनिबद्धः । इदानीमोङ्काराद्यखिलवेदार्थभूतशास्त्रस्य विषयं प्रदर्शयितुमाह **ओतत्ववाचीति** इति सन्न्याय–रत्नावल्युक्तेः । तथाहि :– ओङ्काररहितस्य ब्रह्मशब्दसहितस्य सूत्रस्योपन्यासात् , **न अथशब्दवत्सूत्रोपनिबद्ध** इत्यु–

केश्च । ओङ्काराद्यखिलवेदार्थभूतशास्त्रस्य विषयं प्रदर्शयितु-माहेत्यादिना ओतत्ववाचीत्यनुव्याख्यानस्य वैदिकोङ्कारव्या-ख्यानरूपत्वस्याभिधानाच्च । अन्यथा सूत्रव्याख्यामारभते ओतत्ववाचीत्यवक्ष्यत् ।

• (अ.आ पृष्ट.सं-१७)

तत्रेदमुत्तरं महद्भिरुक्तमिति प्रतिभाति । तथाहि :- अथातो ब्रह्मजिज्ञासेत्यादिमं सूत्रमित्येतत् सन्न्यायरत्नावलीकृतां दर्शनमित्यत्रोङ्काररहितसूत्रोपन्यासः, न अथशब्दवत्सूत्रोप-निबद्ध इत्युक्तिश्च ओङ्काराद्यखिलवेदार्थभूतशास्त्रस्य विषयं प्रदर्शयितुमाहेत्यादिना ओतत्ववाचीत्यनुव्याख्यानस्य वैदिकोङ्कारव्याख्यानरूपत्वाभिधानं चेत्यत्र यल्लिङ्गमित्युक्तं तत्रोङ्कारस्य सूत्रे अध्याहृतत्वेन यथास्थितानुवादरूपत्वेन वा अथशब्दवत् केवलदृष्टार्थत्वाभावेन वा केवला-दृष्टार्थत्वेन वा ओङ्काररहितसूत्रोपन्यासः न अथशब्दवत् सूत्रोपनिबद्ध इत्युक्तिश्च सम्भवति । ईश्वरसद्भावे प्रमाणाभावेन विषयाभावाज्जिज्ञासा न कार्येति पूर्वपक्षे वेदः तत्र प्रमाणमित्यभिप्रायेणोङ्कारस्य सूत्रे प्रयुक्तत्वात् । तादृशप्रयोजनविशेषाभिप्रायेण ओङ्काराद्यखिलवेदार्थभूतं शास्त्रस्य विषयमित्यादिना वैदिकोङ्कारव्याख्यानरूप-

त्वाभिधानमपि सम्भवति । तावन्मात्रेण तथैव सूत्रपाठ इति ज्ञातुमशक्यत्वात् ।


॥ इति प्रथमसूत्रपाठभेदविचाराख्या सङ्ग्रहरुपा कृतिः समाप्ता ॥



परमपूज्य श्रीमत्सुजयीन्द्रतीर्थश्रीपादङ्गळवरु



परमपूज्य श्रीमत्सुशमीन्द्रतीर्थश्रीपादङ्गळवरु



परमपूज्य श्रीमत्सुयतीन्द्रतीर्थश्रीपादङ्गळवरु


परमपूज्य श्रीमत्सुबुधेन्द्रतीर्थश्रीपादङ्गळवरु